Adda247
GET IT ON Google Play

1. "देवीचन्द्रगुप्तम्" इत्यस्य प्रणेता वर्तते –
(1) भवभूतिः
(2) भासः
(3) शूद्रकः
(4) विशाखदत्तः
(5) अनुत्तरित प्रश्न

2. "सुश्लेषवक्रघटनापटु सत्काव्यविरचनमिव" इति कथनं केन सम्बद्धं वर्तते?
(1) दण्डिना
(2) सुबन्धुना
(3) विशाखदत्तेन
(4) अम्बिकादत्तव्यासेन
(5) अनुत्तरित प्रश्न

3. 'दशकुमारचरितम्' इत्यत्र कस्य कुमारस्य वर्णनं न प्राप्यते?
(1) देवश्रुतस्य
(2) विश्रुतस्य
(3) मन्त्रगुप्तस्य
(4) उपहारवर्मणः
(5) अनुत्तरित प्रश्न

4. अचि परे इकः स्थाने आदेशो भवति –
(1) अलादेशः
(2) अजादेशः
(3) अयादेशः
(4) यणादेशः
(5) अनुत्तरित प्रश्न

5. जन्मनः प्राक् कति संस्काराः भवन्ति?
(1) चत्वारः
(2) पञ्च
(3) त्रयः
(4) द्वौ
(5) अनुत्तरित प्रश्न

6. या निशा सर्वभूतानां तस्यां कः जागर्ति?
(1) स्थितप्रज्ञः
(2) गुडाकेशः
(3) योगी
(4) संयमी
(5) अनुत्तरित प्रश्न

7. विश्वेदेवासूक्तस्य मण्डल–सूक्त–ऋषि–छन्दांसि वर्तन्ते –
(1) अष्टमम्–पञ्चाशत्–विश्वामित्रः–गायत्री
(2) अष्टमम्–अष्टाविंशतिः–वामदेवः–अनुष्टुप्
(3) अष्टमम्–पञ्चाशत्–अत्रिः–जगति
(4) अष्टमम्–अष्टपञ्चाशत्–काण्वः–त्रिष्टुप्
(5) अनुत्तरित प्रश्न

Adda247

Test Prime

ALL EXAMS, ONE SUBSCRIPTION

80,000+ Mock Tests

Personalised Report Card

Unlimited Re-Attempt

600+ Exam Covered

20,000+ Previous Year Papers

500% Refund

IBPS

NABARD

ATTEMPT FREE MOCK NOW

Adda247 GET IT ON Google Play

8. यः समुद्रियः नावः पदं वेद सोऽस्ति –
(1) वरुणः
(2) इन्द्रः
(3) अग्निः
(4) सञ्ज्ञानः
(5) अनुत्तरित प्रश्न

9. 'भुक्त्वा व्रजति' इत्यत्र क्त्वा प्रत्ययः केन सूत्रेण भवति?
(1) हलश्च
(2) समानकर्तृकयोः पूर्वकाले
(3) गुरोश्च हलः
(4) उदितो वा
(5) अनुत्तरित प्रश्न

10. "प्रस्थाय" इत्यत्र प्रत्ययो वर्तते –
(1) क्यप्
(2) क्यङ्
(3) ल्यप्
(4) ण्यत्
(5) अनुत्तरित प्रश्न

11. हितोपदेशस्य परिच्छेदेषु न गण्यते –
(1) सन्धिः
(2) सुहृद्भेदः
(3) मित्रलाभः
(4) अपरीक्षितकारकम्
(5) अनुत्तरित प्रश्न

12. पुरुषसूक्तसन्दर्भे संगतमस्ति –
(क) ऋषिः नारायणः
(ख) अष्टादशऋचः
(ग) अन्त्या त्रिष्टुप् छन्दः
(घ) अव्यक्त महदादिविलक्षणः चेतनपुरुषः देवता
(1) (क), (ग), (घ)
(2) (क), (ख), (घ)
(3) (क), (ख)
(4) (क), (ख), (ग)
(5) अनुत्तरित प्रश्न

13. 'सन्तः स्वयं परहिते विहिताभियोगाः' इत्यत्र छन्दो वर्तते –
(1) वसन्ततिलका
(2) भुजङ्गप्रयातम्
(3) द्रुतविलम्बितम्
(4) वंशस्थवृत्तम्
(5) अनुत्तरित प्रश्न

14. 'चिरम्' इति अव्ययस्य कोऽर्थः?
(1) मङ्गलम्
(2) बहुकालः
(3) समुचितः
(4) शीघ्रकार्यम्
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

15. 'अर्धपिप्पली' इत्यस्य विग्रहवाक्यमस्ति –
(1) अर्धं पिप्पली यस्याः
(2) अर्धं पिप्पल्याः
(3) अर्धं पिप्पली
(4) अर्धः पिप्पल्याः
(5) अनुत्तरित प्रश्न

16. 'रामेण बाणेन हतो बाली' अत्र असंगतं वर्तते –
(1) रामेण – कर्तरि तृतीया
(2) हतो – कर्तरि क्तप्रत्ययः
(3) बाली – प्रथमा विभक्तिः
(4) बाणेन – करणे तृतीया
(5) अनुत्तरित प्रश्न

17. छन्दो – लक्षणयोरसङ्गतं युग्मं चिनुत –
(1) वसन्ततिलका – तभजा जगो गः
(2) मालिनी – ननमयययुतेयम्
(3) द्रुतविलम्बित – नभो भरौ
(4) इन्द्रवज्रा – यदि तौ जगौ गौ
(5) अनुत्तरित प्रश्न

18. 'सुधां क्षीरनिधिं मथ्नाति' इत्यत्र 'क्षीरनिधिम्' इत्यस्य पदस्य कर्मसंज्ञाविधायकं सूत्रमस्ति –
(1) कर्त्तुरीप्सिततमं कर्म
(2) अकथितं च
(3) उपान्वध्याङ्वसः
(4) अधिशीङ्स्थासां कर्म
(5) अनुत्तरित प्रश्न

19. एतेषु शुद्धं वाक्यं चिनुत –
(1) वैदिकधर्मः सर्वधर्मात् प्राचीनः
(2) त्वं लेखं लिखति
(3) मनः सत्यात् शुध्यति
(4) अहं पठितुं शक्नोमि
(5) अनुत्तरित प्रश्न

20. 'राजा गुरु को हाथों से प्रणाम करता है।' इति वाक्यस्य शुद्धतमोऽनुवादः कः?
(1) राज्ञः गुरवे हस्ताभ्यां प्रणामं करोति
(2) नृपः गुरुं हस्तात् प्रणमति
(3) राजा गुरवे हस्तेन नमते
(4) राजा गुरुं हस्ताभ्यां प्रणमति
(5) अनुत्तरित प्रश्न

21. 'क्रोशं कुटिला नदी' इति कस्य सूत्रस्योदाहरणमस्ति?
(1) साधकतमं करणम्
(2) कालाध्वनोरत्यन्त संयोगे
(3) कर्तुरीप्सिततमं कर्म
(4) अकथितं च
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

22. कृपयाविष्टमश्रुपूर्णाकुलेक्षणं विषीदन्तम् इत्यादीनि विशेषणानि कस्य वर्तन्ते?
(1) दुर्योधनस्य
(2) कर्णस्य
(3) युधिष्ठिरस्य
(4) अर्जुनस्य
(5) अनुत्तरित प्रश्न

23. वाल्मीकिरामायणे रामस्य वनवासवृत्तान्तः प्राप्यते –
(1) अरण्यकाण्डे
(2) बालकाण्डे
(3) किष्किन्धाकाण्डे
(4) अयोध्याकाण्डे
(5) अनुत्तरित प्रश्न

24. लेनिनामृतम् महाकाव्ये कति सर्गाः सन्ति?
(1) एकादश
(2) षोडश
(3) पञ्चदश
(4) पञ्चविंशति
(5) अनुत्तरित प्रश्न

25. "सेव्" धातोः लोट्लकारे उत्तमपुरुषैकवचने रूपं भवति –
(1) सेवेय
(2) सेवै
(3) सेविताहे
(4) सेवे
(5) अनुत्तरित प्रश्न

26. अधोलिखितेषु शुद्धं वाक्यमस्ति –
(1) गेये केन विनीतौ युवाम्
(2) गेये कस्मात् विनीतो युवाम्
(3) गेये केन विनीतो वाम्
(4) गेये केन विनीताः युवाम्
(5) अनुत्तरित प्रश्न

27. "मुक्तेषु रश्मिषु निरायतपूर्वकायाः" वाक्येऽस्मिन् कस्तावदुपसर्गः?
(1) आयत
(2) रश्मि
(3) पूर्व
(4) निर्
(5) अनुत्तरित प्रश्न

28. भट्टमथुरानाथशास्त्रिणो रचना नास्ति –
(1) साहित्यवैभवम्
(2) गोपालवैभवम्
(3) जयपुरवैभवम्
(4) आदर्शरमणी
(5) अनुत्तरित प्रश्न

29. अप्रस्तुतप्रस्तुतयोरेकधर्माभिसम्बन्धो किं निगद्यते?
(1) यमकम्
(2) उत्प्रेक्षा
(3) दीपकम्
(4) रूपकम्
(5) अनुत्तरित प्रश्न

Adda247
GET IT ON Google Play

30. 'एचोऽयवायावः' इति सूत्रं प्रवर्तते?
(1) यद्यपि
(2) मैवम्
(3) तन्वङ्गी
(4) पावकः
(5) अनुत्तरित प्रश्न

31. अनुदात्तसञ्ज्ञाविधायकं सूत्रमस्ति –
(1) समाहारः स्वरितः
(2) उच्चैरुदात्तः
(3) नीचैरनुदात्तः
(4) आदिरन्त्येन सहेता
(5) अनुत्तरित प्रश्न

32. 'मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम्' इति कस्येदं कथनम्?
(1) सूतस्य
(2) विदूषकस्य
(3) दुष्यन्तस्य
(4) कण्वस्य
(5) अनुत्तरित प्रश्न

33. "चक्रिण्ढौकसे" इत्यत्र सन्धिविधायकं सूत्रमस्ति –
(1) स्तोः श्चुना श्चुः
(2) ष्टुना ष्टुः
(3) शश्छोऽटि
(4) मोऽनुस्वारः
(5) अनुत्तरित प्रश्न

34. 'पाणी च पादौ च एषां समाहारः' इत्यस्य समस्तं पदं वर्तते –
(1) पाणिपादानि
(2) पाणिपादम्
(3) पाणिपादाः
(4) पाणिपादे
(5) अनुत्तरित प्रश्न

35. एतेषु अव्ययं नास्ति –
(1) किमर्थम्
(2) इदानीम्
(3) कदापि
(4) रायम्
(5) अनुत्तरित प्रश्न

36. औकारस्य उच्चारणस्थानमस्ति –
(1) मूर्धा
(2) ओष्ठः
(3) कण्ठतालु
(4) कण्ठोष्ठम्
(5) अनुत्तरित प्रश्न

Adda247
GET IT ON Google Play

37. भासप्रणीतं रामकथाश्रितं रूपकमेतेषु वर्तते –
(1) दूतवाक्यम्
(2) अभिषेकमितिनाटकम्
(3) पंचरात्रम्
(4) अविमारकम्
(5) अनुत्तरित प्रश्न

38. 'शुष्कः' इत्यत्र कः प्रत्ययः?
(1) खः
(2) ष्फः
(3) क्तः
(4) कः
(5) अनुत्तरित प्रश्न

39. 'पञ्चगङ्गम्' इत्यत्र कः समासः?
(1) तत्पुरुषः
(2) बहुव्रीहिः
(3) अव्ययीभावः
(4) द्विगुः
(5) अनुत्तरित प्रश्न

40. चिह्नानुसारं छन्दो निर्धारयत –
"ऽऽऽ ऽ।। ।।। ऽऽ। ऽऽ। ऽऽ"
(1) मालिनी
(2) शिखरिणी
(3) वसन्ततिलका
(4) मन्दाक्रान्ता
(5) अनुत्तरित प्रश्न

41. ईशावास्योपनिषत् केन सम्बद्धाऽस्ति?
(1) यजुर्वेदेन
(2) सामवेदेन
(3) अथर्ववेदेन
(4) ऋग्वेदेन
(5) अनुत्तरित प्रश्न

42. "ओजायमानं यो अहिं जघान दानुं शयानं" सोऽस्ति –
(1) इन्द्रः
(2) अग्निः
(3) विष्णुः
(4) वरुणः
(5) अनुत्तरित प्रश्न

43. निम्नलिखितासु देवर्षिकलानाथशास्त्रिणः रचना नास्ति –
(1) कवितावल्लरी
(2) आख्यानवल्लरी
(3) नाट्यवल्लरी
(4) कथावल्लरी
(5) अनुत्तरित प्रश्न

44. "शिवोऽर्च्यः" इत्यस्य सन्धिविच्छेदो भवति –
(1) शिवस + अर्च्यः
(2) शिव + अर्च्यः
(3) शिव + उर्च्यः
(4) शिवस् + अर्च्यः
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

45. एतेषु किं संगतं नास्ति?
(1) पञ्चतन्त्रम् – पञ्चखण्डेषु विभाजितम्
(2) शृंगारशतकम् – काम–विलासादीनां वर्णनम्
(3) नीतिशतकम् – विद्या–उदारता–वीरतादीनां वर्णनम्
(4) वैराग्यशतकम् – अमरूककविना लिखितम्
(5) अनुत्तरित प्रश्न

46. अधस्तनेषु लिखितेषु उपसर्गो नास्ति –
(1) निर्
(2) दुर्
(3) अति
(4) गिर्
(5) अनुत्तरित प्रश्न

47. श्रीमद्भगवद्गीतायाः द्वितीयाध्यायस्य किं नाम्?
(1) अर्जुनविषादयोगो नाम
(2) कर्मयोगो नाम
(3) ज्ञानकर्मसंन्यासयोगो नाम
(4) सांख्ययोगो नाम
(5) अनुत्तरित प्रश्न

48. उत्तररामचरिते वीररस वर्णने प्रयुक्ता रीतिरस्ति?
(1) लाटी
(2) गौडी
(3) पाञ्चाली
(4) वैदर्भी
(5) अनुत्तरित प्रश्न

49. मनोगतान् सर्वान् कामान् विहाय आत्मनि एव तुष्टः सः कः उच्यते?
(1) स्थितप्रज्ञः
(2) स्थितधीः
(3) आत्मस्थः
(4) योगस्थः
(5) अनुत्तरित प्रश्न

50. 'पंकजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः' इत्यत्र कः अलंकारः?
(1) स्मृतिः
(2) व्यतिरेकः
(3) सन्देहः
(4) भ्रान्तिमान्
(5) अनुत्तरित प्रश्न

51. ढरेफयोर्लोपे पूर्वस्याणो दीर्घविधायकं सूत्रं वर्तते –
(1) ढ्रलोपे पूर्वस्य दीर्घोऽणः
(2) प्रथमयोः पूर्वसवर्णः
(3) दीर्घाज्जसि च
(4) अकः सवर्णे दीर्घः
(5) अनुत्तरित प्रश्न

52. पञ्चमहायज्ञेषु न गण्यते –
(1) नृयज्ञः
(2) पितृयज्ञः
(3) देवयज्ञः
(4) वाजपेययज्ञः
(5) अनुत्तरित प्रश्न

Adda247
GET IT ON Google Play

53. वेदाध्ययनसम्पूर्तौ संस्कारः क्रियते –
(1) समावर्तन संस्कारः
(2) विवाह संस्कारः
(3) वेदारम्भः संस्कारः
(4) उपनयन संस्कारः
(5) अनुत्तरित प्रश्न

54. 'भदन्त' इति नाम्ना प्रसिद्धः कविरस्ति –
(1) श्रीहर्षः
(2) अश्वघोषः
(3) भारविः
(4) माघः
(5) अनुत्तरित प्रश्न

55. स्रग्धरा सन्दर्भे किं संगतं नास्ति?
(1) मगणरगणभगणनगणतगणत्रय वर्णाः जायन्ते।
(2) त्रिमुनियतियुता कीर्तितेयम्।
(3) अत्र एकविंशति वर्णाः भवन्ति।
(4) सप्त–सप्त सप्तषु च यतिः भवति।
(5) अनुत्तरित प्रश्न

56. कादम्बरीकारो बाणभट्टः सभापण्डितः आसीत् –
(1) कान्यकुब्जाधिपस्य हर्षदेवस्य
(2) धाराधिपस्य भोजस्य
(3) निषिधाधिपस्य नलस्य
(4) उज्जयिन्यधिपस्य विक्रमस्य
(5) अनुत्तरित प्रश्न

57. "कृष्णौत्कण्ठ्यम्" इत्यत्र सन्धिविधायकं सूत्रमस्ति –
(1) वृद्धिरेचि
(2) इको यणचि
(3) एङि पररूपम्
(4) आद् गुणः
(5) अनुत्तरित प्रश्न

58. समुचितं मेलनं कुरुत –

| | |
|---|---|
| (क) वारीणि | (i) तृतीयैकवचनम् |
| (ख) मधुनी | (ii) सप्तमीद्विवचनम् |
| (ग) नद्या | (iii) द्वितीयाद्विवचनम् |
| (घ) मत्योः | (iv) द्वितीयाबहुवचनम् |

(1) (क)–(iii), (ख)–(iv), (ग)–(ii), (घ)–(i)
(2) (क)–(iv), (ख)–(iii), (ग)–(i), (घ)–(ii)
(3) (क)–(i), (ख)–(ii), (ग)–(iii), (घ)–(iv)
(4) (क)–(ii), (ख)–(i), (ग)–(iv), (घ)–(iii)
(5) अनुत्तरित प्रश्न

59. पतिशब्दस्य पञ्चमीविभक्तौ रूपं भवति –
(1) पतेः
(2) पत्यात्
(3) पत्याः
(4) पत्युः
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

60. यथोचितं मेलनं कुरुत –

| | |
|---|---|
| (क) एतद् मुरारिः | (i) झयो होऽन्यतरस्याम् |
| (ख) विद्वाँल्लिखति | (ii) मोऽनुस्वारः |
| (ग) वाग्घरिः | (iii) तोर्लि |
| (घ) हरिं वन्दे | (iv) यरोऽनुनासिकेऽनुनासिको वा |

(1) (क)–(iv), (ख)–(iii), (ग)–(i), (घ)–(ii)
(2) (क)–(iii), (ख)–(i), (ग)–(ii), (घ)–(iv)
(3) (क)–(i), (ख)–(ii), (ग)–(iii), (घ)–(iv)
(4) (क)–(ii), (ख)–(iv), (ग)–(i), (घ)–(iii)
(5) अनुत्तरित प्रश्न

61. कालिदासस्य रचना न वर्तते –
(1) ऋतुसंहारम्
(2) कुमारशेखरम्
(3) रघुवंशम्
(4) मेघदूतम्
(5) अनुत्तरित प्रश्न

62. "लभ्" धातोः लटि मध्यमपुरुषे रूपाणि भवन्ति –
(1) लभासे, लभथे, लभध्व
(2) लभस्व, लभाथे, लभाध्वे
(3) लभिस्ये, लभाथाम्, लभथाः
(4) लभसे, लभेथे, लभध्वे
(5) अनुत्तरित प्रश्न

63. मतिशब्दस्य द्वितीयाबहुवचने किं रूपम्?
(1) मत्यः
(2) मतयः
(3) मतीः
(4) मतिन्
(5) अनुत्तरित प्रश्न

64. जश्त्व – विधानं भवति –
(1) बशः स्थाने
(2) भषः स्थाने
(3) झलां स्थाने
(4) हशः स्थाने
(5) अनुत्तरित प्रश्न

65. अत्र समीचीनं युग्मं चिनुत –
(1) क्रोधोऽनमर्षः
(2) गुणेषु अक्षमा
(3) ईर्ष्यासूया
(4) द्रोहोऽपकारः
(5) अनुत्तरित प्रश्न

66. 'हिमवतो गङ्गा प्रभवति' सूत्रस्योदाहरणमस्ति –
(1) भुवः प्रभवः
(2) जनिकर्तुः प्रकृतिः
(3) अपादाने पंचमी
(4) आख्यातोपयोगे
(5) अनुत्तरित प्रश्न

67. दण्डिना दशकुमारचरिते मन्त्रगुप्तमुखेन निरोष्ठ्यवर्णप्रयोगः कारितः –
(1) अष्टमोच्छ्वासे
(2) पञ्चमोच्छ्वासे
(3) षष्ठोच्छ्वासे
(4) सप्तमोच्छ्वासे
(5) अनुत्तरित प्रश्न

68. 'भूयिष्ठां ते नम उक्तिं विधेम' इत्यनेन नमनं कस्मै देवाय विहितम्?
(1) अग्नये
(2) इन्द्राय
(3) विष्णवे
(4) वरुणाय
(5) अनुत्तरित प्रश्न

69. पुरुषसूक्तसन्दर्भे सुंमेलनं कुरुत –

| | |
|---|---|
| (क) चन्द्रमा | (i) प्राणात् |
| (ख) सूर्यः | (ii) मनसो |
| (ग) इन्द्रश्चाग्निः | (iii) चक्षोः |
| (घ) वायुः | (iv) मुखात् |

(1) (क)–(ii), (ख)–(iii), (ग)–(iv), (घ)–(i)
(2) (क)–(ii), (ख)–(iv), (ग)–(i), (घ)–(iii)
(3) (क)–(iii), (ख)–(iv), (ग)–(ii), (घ)–(i)
(4) (क)–(i), (ख)–(ii), (ग)–(iii), (घ)–(iv)
(5) अनुत्तरित प्रश्न

70. यत्र उपमानादुपमेयस्य आधिक्यं वर्ण्यते तत्र भवति –
(1) दीपकालङ्कारः
(2) दृष्टान्तालङ्कारः
(3) व्यतिरेकालङ्कारः
(4) रूपकालङ्कारः
(5) अनुत्तरित प्रश्न

71. पूर्वरूपविधायकं सूत्रं वर्तते –
(1) पूर्वत्रासिद्धम्
(2) उदः स्थास्तम्भोः पूर्वस्य
(3) एङः पदान्तादति
(4) प्रथमयोः पूर्वसवर्णः
(5) अनुत्तरित प्रश्न

72. "विसर्जनीयस्य सः" इति सूत्रेण सकारो भवति –
(1) जशि परे
(2) खरि परे
(3) अचि परे
(4) झलि परे
(5) अनुत्तरित प्रश्न

73. "पच्" धातोः लृटि मध्यमपुरुषद्विवचने, लोटि मध्यमपुरुषद्विवचने, लङि मध्यमपुरुषबहुवचने च रूपाणि भवन्ति –
(1) पक्ष्यथ, पचत, अपचत्
(2) पक्ष्यथः, पचतम्, अपचत
(3) पचिष्यथः, पचताम्, अपचतम्
(4) पक्ष्यतः, पक्ष्यतम्, अपचः
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

74. "जनिकर्तुः प्रकृतिः" इत्यनेन किं भवति?
(1) अधिकरणम्
(2) सम्प्रदानम्
(3) करणम्
(4) अपादानम्
(5) अनुत्तरित प्रश्न

75. शूद्रकमते दिशः शून्याः कस्य?
(1) दरिद्रस्य
(2) मूर्खस्य
(3) अपुत्रस्य
(4) अमित्रस्य
(5) अनुत्तरित प्रश्न

76. 'एषा ध्वनिः श्रवणयोर्मूर्च्छति' इत्यस्य शुद्धं वाक्यमस्ति –
(1) एष ध्वनिः श्रवणयोर्मूर्छति
(2) एतत् ध्वनि श्रवणयोर्मूर्छतः
(3) एष ध्वनिना श्रवणमूर्च्छति
(4) एष ध्वनिं श्रावणमूर्च्छति
(5) अनुत्तरित प्रश्न

77. "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इत्यत्र कस्य शब्दस्य प्रत्येकं योगः?
(1) वचनशब्दस्य
(2) मात्रशब्दस्य
(3) परिमाणशब्दस्य
(4) लिङ्गशब्दस्य
(5) अनुत्तरित प्रश्न

78. अव्ययीभावसमासे प्रायेण कस्य प्राधान्यं भवति?
(1) उत्तरपदार्थस्य
(2) अन्यपदार्थस्य
(3) पूर्वपदार्थस्य
(4) उभयपदार्थस्य
(5) अनुत्तरित प्रश्न

79. "कारकः" इत्यत्र 'कृ' धातोः प्रत्ययो भवति –
(1) क्यप्
(2) क्तः
(3) घञ्
(4) ण्वुल्
(5) अनुत्तरित प्रश्न

80. सत्यस्यापिहितं मुखं कस्मै अपावृणु?
(1) सर्वजनहिताय
(2) सत्यार्थप्रकाशाय
(3) सर्वलोकाय दृष्टये
(4) सत्यधर्माय दृष्टये
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

81. 'अपवर्गे तृतीया' अत्र अपवर्गपदस्यार्थः वर्तते –
(1) दानप्राप्तिः
(2) फलप्राप्तिः
(3) कर्मप्राप्तिः
(4) ज्ञानप्राप्तिः
(5) अनुत्तरित प्रश्न

82. "रूपवती भार्या यस्य सः" इत्यस्य समस्तपदं वर्तते –
(1) रूपवद्भार्यः
(2) रूपवन्भार्या
(3) रूपवद्भार्या
(4) रूपवतीभार्यः
(5) अनुत्तरित प्रश्न

83. "शान्तः" इत्यत्र सन्धिविधायकं सूत्रमस्ति –
(1) यरोऽनुनासिकेऽनुनासिको वा
(2) मोऽनुस्वारः
(3) नश्चाऽपदान्तस्य झलि
(4) अनुस्वारस्य ययि परसवर्णः
(5) अनुत्तरित प्रश्न

84. अयं कः वृद्धिचन्द्रशास्त्रिणः पुत्रोऽस्ति?
(1) पं. पद्मशास्त्री
(2) डॉ. प्रभाकरशास्त्री
(3) भट्टमथुरानाथशास्त्री
(4) कलानाथशास्त्री
(5) अनुत्तरित प्रश्न

85. शुद्धं वाक्यं चिनुत –
(1) दुर्जनः कन्यायाः अपहरति
(2) भवन्तः विद्यायाः प्रमाणाः सन्ति
(3) दशम्यां कक्षायां शतं छात्राः सन्ति
(4) दम्पती पुत्रम् अभाषत
(5) अनुत्तरित प्रश्न

86. 'पुस्तकस्य पठनं करोति' अत्र सूत्रं प्रवर्तते –
(1) षष्ठी चानादरे
(2) यतश्च निर्धारणम्
(3) जनिकर्तुः प्रकृतिः
(4) कर्तृकर्मणोः कृति
(5) अनुत्तरित प्रश्न

87. यत्र उपमेयोपमानवाक्ययोः निर्दिष्टेषु भिन्नधर्मेषु बिम्बप्रतिबिम्बभावोऽस्ति तत्र अलंकारो भवति –
(1) दीपकालंकारः
(2) यमकालंकारः
(3) उत्प्रेक्षालंकारः
(4) दृष्टान्तालंकारः
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

88. अम्बिकादत्तव्यासप्रणीते शिवराजविजये कति निःश्वासाः सन्ति?

(1) द्वादश
(2) पञ्च
(3) एकादश
(4) अष्ट
(5) अनुत्तरित प्रश्न

89. 'जहि' इति रूपं कस्य धातोर्वर्तते?

(1) अस् धातोः
(2) हि धातोः
(3) हन् धातोः
(4) हा धातोः
(5) अनुत्तरित प्रश्न

90. 'एधि' इति रूपं कस्य धातोः वर्तते?

(1) अस् धातोः
(2) एध् धातोः
(3) प्रच्छ् धातोः
(4) इण् धातोः
(5) अनुत्तरित प्रश्न

91. "आपरितोषाद् विदुषां न साधु मन्ये प्रयोग–विज्ञानम्" इत्यस्मिन् वाक्ये उपसर्गाः सन्ति –

(1) द्वौ
(2) पञ्च
(3) त्रयः
(4) चत्वारः
(5) अनुत्तरित प्रश्न

92. "बालक के पिता से रास्ता पूछता है।" अस्य वाक्यस्य संस्कृते अनुवादो विधेयः –

(1) बालकस्य पितुः पन्थाः पृच्छति
(2) बालकस्य पितरि पन्थानं पृच्छति
(3) बालकस्य पित्रा पन्थानं पृच्छति
(4) बालकस्य पितरं पन्थानं पृच्छति
(5) अनुत्तरित प्रश्न

93. 'यत्र निह्नुतिं विना हेत्वादिः उन्नीयते' तत्र अलङ्कारो जायते –

(1) उत्प्रेक्षा
(2) निदर्शना
(3) अनुप्रासः
(4) उपमा
(5) अनुत्तरित प्रश्न

94. "उदेति पूर्वं कुसुमं ततः फलम्" अत्र किं छन्दः?

(1) तोटकम्
(2) भुजङ्गप्रयातम्
(3) वंशस्थम्
(4) द्रुतविलम्बितम्
(5) अनुत्तरित प्रश्न

95. आभ्याम् इत्यस्य मूलशब्दः कः वर्तते?

(1) अस्मद्
(2) अदस्
(3) अयम्
(4) इदम्
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

96. यथोचितं परस्परं मेलयत –

| | |
|---|---|
| (क) विष्णूदयः | (i) ईदूदेद् द्विवचनं प्रगृह्यम् |
| (ख) हरेऽव | (ii) एङि पररूपम् |
| (ग) गङ्गे अमू | (iii) अकः सवर्णे दीर्घः |
| (घ) प्रेजते | (iv) एङः पदान्तादति |

(1) (क)–(iv), (ख)–(i), (ग)–(ii), (घ)–(iii)
(2) (क)–(i), (ख)–(ii), (ग)–(iii), (घ)–(iv)
(3) (क)–(iii), (ख)–(iv), (ग)–(i), (घ)–(ii)
(4) (क)–(ii), (ख)–(iii), (ग)–(iv), (घ)–(i)
(5) अनुत्तरित प्रश्न

97. 'विभूषणं मौनमपण्डितानाम्' इति सुभाषितं कस्य?
(1) भवभूतेः
(2) नारायणपण्डितस्य
(3) भर्तृहरेः
(4) विष्णुशर्मणः
(5) अनुत्तरित प्रश्न

98. 'यतश्च निर्धारणम्' सूत्रस्योदाहरणे संगतं वाक्यं वर्तते –
(1) गच्छतां गच्छन् वा धावन् शीघ्रः
(2) छात्राणां छात्रेभ्यः वा मैत्रः पटुः
(3) नृणां नृषु वा द्विजः श्रेष्ठः
(4) गवां गवे वा कृष्णा बहुक्षीरा
(5) अनुत्तरित प्रश्न

99. यमक–पदस्यार्थो भवति –
(1) टीकायुक्तः
(2) युगलः
(3) रज्जिका
(4) शब्दसमूहः
(5) अनुत्तरित प्रश्न

100. वर्णानामतिशयित – सन्निधेः सञ्ज्ञा भवति –
(1) संहितासञ्ज्ञा
(2) पदसञ्ज्ञा
(3) संयोगसञ्ज्ञा
(4) सवर्णसञ्ज्ञा
(5) अनुत्तरित प्रश्न

101. 'न पराभवमाप्नोति शक्रादपि कदाचन' कथनमिदं कस्य ग्रन्थस्य अस्ति?
(1) वैराग्यशतकस्य
(2) पञ्चतन्त्रस्य
(3) श्रृंगारशतकस्य
(4) हितोपदेशस्य
(5) अनुत्तरित प्रश्न

102. 'शिशुपालवधम्' इत्यस्य कथानकं महाभारतस्य कस्मिन् पर्वणि विद्यते?
(1) भीष्मपर्वणि
(2) शान्तिपर्वणि
(3) सभापर्वणि
(4) वनपर्वणि
(5) अनुत्तरित प्रश्न

Adda247
GET IT ON Google Play

103. उपनयनसंस्कारसम्बन्धे एषु संगतं नास्ति –
(1) ब्राह्मणस्य अष्टमे वर्षे
(2) क्षत्रियस्य एकादश वर्षे
(3) वैश्यस्य द्वादश वर्षे
(4) शूद्रस्य पञ्चविंशति वर्षे
(5) अनुत्तरित प्रश्न

104. "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" अत्र गणव्यवस्थां चिनुत –
(1) नगण, नगण, मगण, यगण, यगण
(2) नगण, मगण, यगण, नगण, यगण
(3) नगण, नगण, यगण, मगण, यगण
(4) नगण, मगण, नगण, यगण, यगण
(5) अनुत्तरित प्रश्न

105. "धेनु" शब्दस्य "धेन्वाम्–धेनौ" रूपे स्तः –
(1) सप्तम्येकवचनस्य
(2) षष्ठीबहुवचनस्य
(3) पञ्चम्येकवचनस्य
(4) प्रथमाद्विवचनस्य
(5) अनुत्तरित प्रश्न

106. "अकः सवर्णे दीर्घः" इत्यस्योदाहरणमस्ति –
(1) श्रीशः
(2) इत्याश्रमः
(3) वध्वालयः
(4) श्रियायुद्यतः
(5) अनुत्तरित प्रश्न

107. कृषि–पशुपालनं–वाणिज्यं कस्य कर्म कथ्यते?
(1) ब्राह्मणस्य
(2) वैश्यस्य
(3) क्षत्रियस्य
(4) कुलीनस्य
(5) अनुत्तरित प्रश्न

108. "पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत" कोऽभिप्रेतः?
(1) वरुणः
(2) इन्द्रः
(3) पुरुषः
(4) अग्निः
(5) अनुत्तरित प्रश्न

109. एतेषु अव्ययं नास्ति –
(1) यत्र
(2) अद्य
(3) पुनः
(4) कति
(5) अनुत्तरित प्रश्न

110. रूपकालङ्कारो भवति –
(1) एकस्यैव उपमानोपमेयत्वे सति।
(2) उपमेयस्य उपमानाद् आधिक्यवर्णने सति।
(3) उपमानोपमेययोरभेदवर्णने सति।
(4) उपमेयस्य उपमानेन सह सम्भावनायाम्।
(5) अनुत्तरित प्रश्न

Adda247
GET IT ON Google Play

111. 'हनूमानब्धिमतरद् दुष्करं किं महात्मनाम्' अत्र कोऽलङ्कारः?
(1) भ्रान्तिमान्
(2) दीपकम्
(3) दृष्टान्तः
(4) अर्थान्तरन्यासः
(5) अनुत्तरित प्रश्न

112. रघुवंशमहाकाव्यस्य कः सर्गः 'इन्दुमती–स्वयम्वर' रूपेण उत्कृष्टतां प्राप्नोति?
(1) प्रथमसर्गः
(2) चतुर्थसर्गः
(3) षष्ठसर्गः
(4) सप्तमसर्गः
(5) अनुत्तरित प्रश्न

113. मानवंशमहाकाव्यस्य रचनाकारः कः वर्तते?
(1) भट्टमथुरानाथशास्त्री
(2) कलानाथशास्त्री
(3) प्रभाकरशास्त्री
(4) सूर्यनारायणशास्त्री
(5) अनुत्तरित प्रश्न

114. अधोलिखितेषु इत्सञ्ज्ञाविधायकं सूत्रं वर्तते –
(1) अदर्शनं लोपः
(2) सुप्तिङन्तं पदम्
(3) हलन्त्यम्
(4) तस्य लोपः
(5) अनुत्तरित प्रश्न

115. 'अधिपूर्वाणामेषाम् आधारः कर्म स्यात्' इत्यस्योदाहरणं नास्ति –
(1) अधिशेते वैकुण्ठं हरिः
(2) अधिवसति वैकुण्ठं हरिः
(3) अधि तिष्ठति वैकुण्ठं हरिः
(4) अध्यास्ते वैकुण्ठं हरिः
(5) अनुत्तरित प्रश्न

116. प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुरभू –
न्न पतिष्यतः करसहस्रमपि।।
इत्यत्रालङ्कारो वर्तते –
(1) यमकम्
(2) उत्प्रेक्षा
(3) श्लेषः
(4) निदर्शना
(5) अनुत्तरित प्रश्न

117. श्रीमद्भगवद्गीतोक्त दिशा क्रोधोत्पत्तेः क्रमो वर्तते –
(1) विषयध्यानं–सङ्गः–कामः–क्रोधः
(2) विषयध्यानं–कामः–सङ्गः–क्रोधः
(3) सङ्गः–विषयध्यानं–कामः–क्रोधः
(4) कामः–विषयध्यानं–सङ्गः–क्रोधः
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

118. "यः सुन्वते पचते दुध्र आ चिद्
वाजं दर्दर्षि स किलासि सत्यः।"
इतिमन्त्रः केन सम्बद्धः वर्तते?
(1) रुद्रेण
(2) इन्द्रेण
(3) वरुणेन
(4) अग्निना
(5) अनुत्तरित प्रश्न

119. द्रुतविलम्बितं छन्दः कस्मिन् पद्यांशे वर्तते?
(1) हितं मनोहारि च दुर्लभं वचः।
(2) क्षीणोऽप्युपचीयते पुनश्चन्द्रः।
(3) विधिरहो बलवानिति मे मतिः।
(4) यथा प्रकृत्या मधुरं गवां पयः।
(5) अनुत्तरित प्रश्न

120. सुमेलनं कुरुत –

| | |
|---|---|
| (1) वसन्ततिलका | (क) एकविंशतिवर्णाः |
| (2) मालिनी | (ख) चतुर्दशवर्णाः |
| (3) शिखरिणी | (ग) पञ्चदशवर्णाः |
| (4) स्रग्धरा | (घ) सप्तदशवर्णाः |

(1) (1)–(घ), (2)–(ग), (3)–(ख), (4)–(क)
(2) (1)–(ख), (2)–(ग), (3)–(घ), (4)–(क)
(3) (1)–(ग), (2)–(घ), (3)–(ख), (4)–(क)
(4) (1)–(क), (2)–(ख), (3)–(ग), (4)–(घ)
(5) अनुत्तरित प्रश्न

121. अधोलिखितयोः कथनयोः सन्दर्भे समुचितं विकल्पं चिनुत –
कथनं (क) : पदान्तस्य सस्य सजुषश्च रुः स्यात्।
कथनं (ख) : अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति।
(1) कथनं (क) तथा (ख) उभौ असमीचीनम्
(2) कथनं (ख) असमीचीनम्
(3) कथनं (क) असमीचीनम्
(4) कथनं (क) तथा (ख) उभौ समीचीनम्
(5) अनुत्तरित प्रश्न

122. रुच्यर्थानां धातूनां प्रयोगे कोऽर्थः संप्रदानं स्यात्?
(1) प्रीयमाणः
(2) ईप्सितः
(3) अप्रीतिपरकः
(4) अनुकूलः
(5) अनुत्तरित प्रश्न

123. द्वादशभिः सप्तभिश्च यत्र यतिर्भवति तद् वृत्तमस्ति –
(1) स्रग्धरा
(2) शार्दूलविक्रीडितम्
(3) शिखरिणी
(4) मालिनी
(5) अनुत्तरित प्रश्न

124. 'अलङ्कारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्' इत्यत्र कविवंशस्य माता कथ्यते –
(1) उत्प्रेक्षा
(2) व्यतिरेकः
(3) उपमा
(4) रूपकम्
(5) अनुत्तरित प्रश्न

125. "शिष्यः" इत्यत्र प्रत्ययो वर्तते –
(1) यत्
(2) ण्यत्
(3) क्यप्
(4) ल्यप्
(5) अनुत्तरित प्रश्न

126. सूत्रोदाहरणयोः असमीचीनं युग्मं चिनुत –
(1) जगतः कर्त्ता परमेश्वरः – षष्ठी चानादरे
(2) ईर्ष्यति मातापुत्राय – क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः
(3) गोषु कृष्णा बहुक्षीरा – यतश्च निर्धारणम्
(4) चोरात् त्रायते – भीत्रार्थानां भयहेतुः
(5) अनुत्तरित प्रश्न

127. सहार्थेन युक्तेऽप्रधाने विभक्तिः भवति –
(1) द्वितीया
(2) षष्ठी
(3) तृतीया
(4) चतुर्थी
(5) अनुत्तरित प्रश्न

128. नारायणपण्डितस्य आश्रयदाता राजा आसीत् –
(1) चन्द्रकृष्णः
(2) कृष्णचन्द्रः
(3) धवलचन्द्रः
(4) अमरशक्तिः
(5) अनुत्तरित प्रश्न

129. 'भूपत्युः सह आगच्छत्' अस्य शुद्ध रूपं वर्तते –
(1) भूपतेः सह आगच्छत्
(2) भूपतिना सह आगच्छत्
(3) भूपत्या सह आगच्छत्
(4) भूपतिना सहेन आगच्छत्
(5) अनुत्तरित प्रश्न

130. 'जगण–तगण–जगण–गुरु' अत्र छन्दो भवति –
(1) उपेन्द्रवज्रा
(2) उपजाति
(3) वंशस्थम्
(4) इन्द्रवज्रा
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

131. यत् कौशलं छात्राणां पूर्वज्ञानस्य परीक्षणं करोति, तत् वर्तते –
(1) प्रश्नोत्तरम्
(2) व्याख्या
(3) पाठ–प्रस्तावना
(4) दृष्टान्तम्
(5) अनुत्तरित प्रश्न

132. भरतमुनिना नाट्यशास्त्रे नाटकस्य उद्देश्येषु इदं वर्जितं नास्ति –
(1) विश्रान्तिजननम्
(2) विनोदजननम्
(3) हितोपदेशजननम्
(4) हास्यजननम्
(5) अनुत्तरित प्रश्न

133. आकाङ्क्षानुगुणं प्रश्नाः पद्यशिक्षणस्य कस्मिन् विधौ भवन्ति?
(1) खण्डान्वयविधौ
(2) दण्डान्वयविधौ
(3) अन्वयविधौ
(4) ह्यूरिस्टिकविधौ
(5) अनुत्तरित प्रश्न

134. "इयं छात्रैः शिक्षकैश्च प्रयुज्यमाना विद्या अस्ति, यतः शिक्षक अस्य उपकरण साहाय्येन निर्देशनं ददाति, छात्रश्च व्याख्याम् आत्मानः अभिव्यक्तिञ्च करोति" कथनमिदम् कस्य अस्ति?
(1) प्रोफेसर स्ट्रक
(2) जॉन डीवी
(3) स्किनर
(4) चोम्स्की
(5) अनुत्तरित प्रश्न

135. गद्यशिक्षणाध्यापने प्रथमपञ्चसोपानानां समुचितः क्रमः वर्तते –
(1) प्रस्तावना, उद्देश्यकथनम्, आदर्शवाचनम्, अशुद्धिसंशोधनम्, अनुवाचनम्
(2) उद्देश्यकथनम्, प्रस्तुतीकरणम्, प्रस्तावना, आदर्शवाचनम्, अनुवाचनम्
(3) प्रस्तावना, आदर्शवाचनम्, अशुद्धिसंशोधनम्, काठिन्यनिवारणम्, अनुवाचनम्
(4) प्रस्तावना, उद्देश्यकथनम्, प्रस्तुतीकरणम्, आदर्शवाचनम्, अनुवाचनम्
(5) अनुत्तरित प्रश्न

136. व्याकरणशिक्षणे प्रकृतेः प्रत्ययस्य च स्पष्टज्ञानेन शब्दस्वरूपं कस्मिन् विधौ सुष्ठु अधिगम्यते?
(1) सहयोगविधिः समवायविधिर्वा
(2) अर्थावबोधविधिः
(3) अन्वयव्यतिरेकविधिः
(4) आगमनविधिः
(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

137. पूर्वसूरिभिः वर्णितानि जीवने अनुभवेन प्राप्तानि उदाहरणानि च अध्यापकेन विषयावबोधदृष्ट्या छात्रेभ्यः सारल्येन कस्मिन् कौशले बोध्यन्ते?

(1) दृष्टान्तकौशले

(2) व्याख्याकौशले

(3) प्रेरकवैविध्यकौशले

(4) प्रस्तावनाकौशले

(5) अनुत्तरित प्रश्न

138. प्राचीनकाले छात्रस्य प्रवेशसमये तस्य लेखन –

पट्टिकायामुपरि "ॐ नमः सिद्धम्" इति वाक्यलेखनाभ्यासः भवति स्म, इदमेव पुनः पुनः पठनाय कथ्यते स्म, अनेन शनैः शनैः छात्रः वाक्यस्य वर्णैः परिचितः भवति स्म। पठनशिक्षणस्य अयं विधिः केन नाम्ना ज्ञायते?

(1) चित्र विधिः

(2) अनुकरण विधिः

(3) वर्णोच्चारण विधिः

(4) ध्वनिसाम्य विधिः

(5) अनुत्तरित प्रश्न

139. सुलेखस्य अभ्यासाय कः विधिः न उपयुज्यते?

(1) श्रुतलेखः

(2) अनुलेखः

(3) अभिलेखः

(4) प्रतिलेखः

(5) अनुत्तरित प्रश्न

140. निम्नाङ्कितेषु किं वाक्यं पठनकौशलेन सह असम्बद्धता भजते?

(1) पठनस्य प्रकारेषु व्यक्तिगतपठनम्, सामूहिकपठनम्, मौनपठनम्, सस्वरपठनम्, आदर्शपठनम्, अनुकरणपठनम् च अन्तर्भवन्ति।

(2) पठनेन आरोग्यम्, बुद्धिः, शास्त्रेण सह प्रीतिः चेते गुणाः विकसन्ति।

(3) पठनेन जीवने मूर्खत्वं न जायते।

(4) पठनकाले दृश्येन्द्रियस्य, ध्वनियन्त्रस्य, मस्तिष्कस्य समन्वयः च न जायते।

(5) अनुत्तरित प्रश्न

141. "ज्ञातादज्ञातं प्रति" इति शिक्षणसूत्रस्य प्रयोगः पाठनकाले प्राधान्येन कस्मिन् सोपाने कर्तुं शक्यते?

(1) अनुवाचनकाले

(2) प्रस्तावनाप्रश्नेषु

(3) पुनरावृत्यात्मकप्रश्नेषु

(4) आदर्शवाचनकाले

(5) अनुत्तरित प्रश्न

Adda247 GET IT ON Google Play

142. मानवस्वभावस्य अध्ययनपुरस्सरं विभिन्न–जीवनदर्शनानां ज्ञानसहितं संवादयुक्तं स्वस्थ–मनोरञ्जनसहितं कस्य शिक्षणस्य पाठयोजना निर्मीयते?

(1) नाटकशिक्षणपाठयोजना

(2) कथाशिक्षणपाठयोजना

(3) व्याकरणशिक्षणपाठयोजना

(4) पद्यशिक्षणपाठयोजना

(5) अनुत्तरित प्रश्न

143. "पाठयोजना तत्कथनाय शीर्षकं ददाति, यत् शिक्षकस्य मार्गदर्शने दैनिकगतिविधीनां परिणामत्वेन प्राप्तव्यानाम् उपलब्धीनाम्, प्रयोक्तव्यानां साधनानां च वर्णनं करोति।" एतत् मतं कस्य अस्ति?

(1) नेल्सन एल. बोसिंग

(2) शिक्षाशब्दकोशः

(3) लैंडेन जोसेफ

(4) बिनिंग बिनिंग च

(5) अनुत्तरित प्रश्न

144. अनुवादपाठयोजनायां विधिरयं नोपयुज्यते –

(1) द्विभाषाविधिः

(2) पुस्तकविधिः

(3) शब्दकोषविधिः

(4) अनुकरण–तुलनाविधिः

(5) अनुत्तरित प्रश्न

145. हर्बर्ट महोदयस्य अनुयायिनौ ट्यूइस्कॉन जिलर, विल्हेम रेन महोदयौ 'हर्बर्टपञ्चपदी' इत्यस्य पञ्चानां पदानां व्यावहारिकप्रयोगदृष्ट्या कं क्रमं निर्धारितवन्तौ?

(1) प्रस्तावना
स्पष्टता
सम्बद्धता
प्रणाली
विधिः

(2) प्रस्तावना
प्रस्तुतीकरणम्
तुलना
सामान्यीकरणम्
अनुप्रयोगः

(3) विधिः
प्रणाली
तुलना
स्पष्टता
प्रस्तावना

(4) प्रस्तावना
प्रस्तुतीकरणम्
अनुप्रयोगः
तुलना
सामान्यीकरणम्

(5) अनुत्तरित प्रश्न

Adda247
GET IT ON Google Play

146. नाटकशिक्षणसन्दर्भेऽसत्यं कथनमस्ति –
(1) व्याख्याविधौ अध्यापकः पात्राणां चरित्रस्य भावनाञ्च विश्लेषणं करोति।
(2) कक्षाभिनयविधौ नाटकशिक्षणं गद्यशिक्षणवत् भवति।
(3) आदर्शनाट्यविधौ अध्यापकः स्वयं पात्राणाम् अभिनयं करोति।
(4) पात्राभिनये प्रत्येकं पात्रस्य कृते पृथक्–पृथक् व्यक्तयः संवादं कुर्वन्ति।
(5) अनुत्तरित प्रश्न

147. प्रयोगप्रामाण्यमवलोक्य उदाहरणानां साहाय्येन सामान्यीकृतस्य नियमस्य निर्धारण कस्मिन् विधौ भवति?
(1) आगमनविधिः
(2) प्रायोजनाविधिः
(3) निगमनविधिः
(4) ह्यूरिस्टिकविधिः
(5) अनुत्तरित प्रश्न

148. व्याकरणशिक्षणे अन्वेषणविधेः (ह्यूरिस्टिक विधेः) शिक्षणसोपानानाम् अयं क्रमः समुचितः विद्यते –
(1) समस्यायाः उपस्थापनम्, परिकल्पना, परीक्षणम्, निष्कर्षः
(2) समस्यायाः उपस्थापनम्, तत्वानां निरीक्षणम्–वर्गीकरणञ्च, परिकल्पना, परीक्षणम्, निष्कर्षः
(3) समस्यायाः उपस्थापनम्, परीक्षणम्, निरीक्षणम्, निष्कर्षः
(4) निष्कर्षः, परीक्षणम्, परिकल्पना, तत्वानां निरीक्षणम्, वर्गीकरणञ्च
(5) अनुत्तरित प्रश्न

149. अध्यापनकाले एकैकशब्दस्य विश्लेषणेन सह श्लोकार्थः, श्लोकस्य रचनाशैली, कविपरिचयः, सन्दर्भः, प्रसङ्गः, भावार्थः, अलङ्कारछन्दस्सु प्रकाशश्च अस्मिन् विधौ विशेषरूपेण निरूप्यते –
(1) खण्डान्वयविधौ
(2) भाषानुवादविधौ
(3) व्याख्याविधौ
(4) दण्डान्वयविधौ
(5) अनुत्तरित प्रश्न

150. लेखने शिक्षणे नेत्रयोः, कर्णयोः, हस्तयोश्च प्रशिक्षणे बलं दत्त्वा प्रथम काष्ठे फलके वा निर्मितेषु वृहदक्षरेषु छात्रैः अङ्गुल्याः सञ्चालनस्य अभ्यासः करणीयः, ततः परं तेषु अक्षरेषु लेखन्याः पौनः पुन्येन आवर्तनं करणीयम्। एवं छात्राः अक्षराणां स्वरूपेण परिचिताः सन्तः लेखनमधिगच्छन्ति।
लेखनकौशलस्य कस्मिन् विधौ अनेन प्रकारेण शिक्ष्यते?
(1) जैकटॉट विधौ
(2) अनुलेख–प्रतिलेख विधौ
(3) स्वतन्त्रानुकरण विधौ
(4) मोन्टेसरी विधौ
(5) अनुत्तरित प्रश्न

-----------------------------------------